# 1. समर्चनम्

[The Vedas are the authentic and authoritative books of ancient Indian society and religion. There are 4 Vedas – Rig Veda, Yajur Veda, Sama Veda and Atharva Veda. The verses of the Vedas are called Mantras. In the Veda Mantras, there is sometimes incantation (hymns of praise) and sometimes prayer. Sometimes there is a description of somebody and sometimes deep philosophical ideas. In the present lesson, only three Mantras of incantation, prayer and worship have been included.

Inspired by the Vedas etc. many hymns and prayers have been composed in different meters which have been preserved in human-mind and reached us. Presented here are three such hymns of praise.

We have the tradition of having an invocation at the beginning of the book. With that in mind, let us begin our learning of Sanskrit with an invocation.]




**वैदिकम्**

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥1॥

- ऋग्वेदः १:१:१

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ।
इदमहमनृतात् सत्यमुपैमि ॥2॥

- यजुर्वेदः १:५

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च
मयस्कराय च नमः शिवाय च शिवतराय च ॥3॥

- यजुर्वेदः १६:४१



## लौकिकम्

यं ब्रह्मा वरुणेन्द्र-रुद्र-मरुतः स्तुन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्ग–पद-क्रमोपनिषदैः गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥4॥

भयानां भयं भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैःपदानां नियन्तृ त्वमेकं
परेषां परं रक्षकं रक्षकानाम् ॥5॥

वयं त्वां स्मरामो वयं त्वां भजामो
वयं त्वां जगत्साक्षिरूपं नमामः ।
सदेकं निधानं निरालम्बमीशम्
भवाम्भोधिपोतं शरण्यं व्रजामः ॥6॥

## Glossary

**Noun (masc.) : पुरोहितः** Purohita, Familypriest, one who does rituals of a host **यज्ञः** Yagna, sacrificial rite **रत्नधातमः** one who wears gems **व्रतपतिः** Lord of Vows **शम्भवः** who brings tranquility **मयोभवः** from whom happiness is derived **शङ्करः** one, who does welfare **मयस्करः** one who gives happiness **शिवतरः** extremely beneficial **स्तवः** prayer, song of praise **साक्षिरूपः** witness **निरालम्बः** without support, self-dependent.

**Pronoun :** **तत्** that **यम्** whom **यस्य** whose **तस्मै** for him/to him **त्वम्** you **एकम्** one **परेषाम्** of others **वयम्** we **त्वाम्** to you.

**Adjective :** **दिव्य** divine, **भीषण** dangerous, dreadful **पावन** one who purifies **नियन्तृ** one who governs/controls **पर** best, excellent **निधान** treasure

**Adverb :** **नमः** Salutation ! I bow down

**Compound :** वरुणेन्द्र-रुद्र-मरुतः (वरुणः च इन्द्रः च रुद्रः च मरुतः च इति वरुणेन्द्र....मरुतः, - इतरेतर द्वन्द्वः) सुरासुरगणाः (सुराः च असुराः च इति सुरासुराः, - द्वन्द्वः । सुरासुराणाम् गणाः सुरासुरगणाः - षष्ठी तत्पुरुष ।) (Dissolution (विग्रह) of compounds mentioned in the exercise of the textbook, has been given only to help in teaching.)

**Root (First Gana) :** (Parasmaipada) **चर्** **(चरति)** to practise **गै** **(गायति)** to sing **दृश् - पश्य्** **(पश्यति)** to see **स्मृ** **(स्मरति)** to remember **भज्** **(भजति)** to worship **नम्** **(नमति)** to bow down, to salute **व्रज्** **(व्रजति)** to go, to attain.

## Notes

**(1) Meaning :** **ईळे (ईडे)** I pray **ऋत्विजम्** officiating priest at a sacrifice **होतारम्** to one who performs sacrificial rite (Havana) **शकेयम्** I can **राध्यताम्** make it accomplished **उपैमि** I approach, I attain **स्तुन्वन्ति** they pray **साङ्ग-पद-क्रमोपनिषदैः** six Vedangas, prose in order along with Upanishads **गायन्ति** they sing **सामगाः** reciter of Mantras of Samaveda **ध्यानावस्थिततद्गतेन** having attained state of meditation **मनसा** by the mind **विदुः** they know, they attain **महोच्चैःपदानाम्** of those holding the highest position **नियन्तृ** one who controls **परेषाम्** of the best **जगत्साक्षिरूपम्** epitom of the world **एकम्** only one of its kind **भवाम्भोधिपोतम्** the boat which takes one accross the world like ocean **शरण्यम्** one worthy to take refuge.

**(2) Sandhi :** अग्निमीळे (अग्निमीडे) (अग्निम् ईळे) । तच्छकेयम् (तत् शकेयम्) । तन्मे (तत् मे) । इदमहमनृतात् (इदम् अहम् अनृतात्) । त्वमेकम् (त्वम् एकम्) । भजामो वयम् (भजामः वयम्) । सदेकम् (सत् एकम्) ।

[Vedic language is spoken and written by using accent (सस्वर). There are three kinds of accents. उदात्त, अनुदात्त and स्वरित. While reciting Vedic Mantra उदात्त स्वर is recited in high pitch, अनुदात्त स्वर in low pitch and स्वरित स्वर in medium pitch of tune. While writing the Mantras of Rigveda and Yujurveda, in order to show अनुदात्त स्वर sleeping (horizontal) line (_) is drawn under the particular letter. Similarly to show स्वरित स्वर standing (vertical) line (ˈ) is drawn on the particular letter. No sign is used to show उदात्त स्वर.]

## Exercise

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत ।**

(1) कम् पुरोहितम् ईडे ?

(2) यज्ञस्य देवः कः अस्ति ?

(3) अहं किं चरिष्यामि ?

(4) दिव्यैः स्तवैः के स्तुवन्ति ?

(5) वयं कं शरणं व्रजामः ?

2. **प्रकोष्ठात् उचितं पदं चित्वा वाक्यपूर्तिं कुरुत ।**

(1) अहं .......... रत्नधातमम् ईळे । (अग्निम्, यज्ञम्, पुरोहितम्)

(2) इदम् अहम् .......... उपैमि । (अनृतात्, सत्यम्, व्रतम्)

(3) योगिनः .......... पश्यन्ति । (ज्ञानेन, चक्षुषा, मनसा)

(4) सुरासुरगणाः देवस्य .......... न विदुः । (स्वरूपम्, निवासम्, अन्तम्)

(5) वयं त्वां जगत्साक्षिरूपं .......... । (भजामः, नमामः, स्मरामः)

3. **प्रकोष्ठगतं पदं प्रयुज्य अधोलिखितानि वाक्यानि प्रश्नार्थस्वरूपे परिवर्तयत ।**

(1) देवाय नमः । (कस्मै)

(2) साङ्ग-पद-क्रमोपनिषदैः वेदैः सामगाः गायन्ति । (के)

(3) योगिनः देवं पश्यन्ति । (कम्)

4. **अधोलिखितानां प्रश्नानाम् मातृभाषायाम् उत्तराणि लिखत ।**

(1) Which special qualities of Agnideva have been described in the Mantra ?

(2) Which Vow has been taken from Agni ?

(3) Whose Darshana do the Yogis have ? How ?

(4) How is the divine quality of the one, in whom the devotees take refuge ?

5. **श्लोकपूर्तिं कुरुत ।**

(1) अग्निमीळे ...... रत्नधातमम् ॥

(2) नमः शंभवाय ..... शिवतराय च ॥

(3) वयं त्वां स्मरामो ..... व्रजामः ॥

6. **क-विभागं ख-विभागेन सह यथार्थरीत्या संयोजयत ।**

| क | ख |
|---|---|
| (1) अग्निम् | (1) नमः |
| (2) शिवाय | (2) पुरोहितम् |
| (3) दिव्यैः | (3) न विदुः |
| (4) अन्तम् | (4) प्राणिनाम् |
| (5) सामगाः | (5) स्तवैः |
| (6) गतिः | (6) गायन्ति |
| | (7) ब्रह्मा |

**Activity**

- Learn by heart these Richas of Veda and Shlokas of prayer.
- Transcribe other Richas and Shlokas and exhibit them in the classroom.
- Recite Mantras and Shlokas in the prayerhall of your school.